स्तं स्फुट ८१

ग्रं. सं. २२३

स्तोत्र

सिद्धलक्ष्मी स्तोत्र

६९८/स्तो. २३८

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(1)

पावकोलौकिकोह्यग्निः प्रथमः परिकीर्त्तितः॥ अग्निस्तु मारुतोनामगर्भाधानेविधीयते॥१॥ ततः पुंसवनेज्ञेयः पवमानस्तथैवच॥ सीमंतेमंगलोनाम प्रबलोजातकर्मणि॥२॥ नाम्निवेपार्थिवोह्यग्निः प्राशनेतुशुचिःस्मृतः॥ सभ्योनामसचौलेतु व्रतादेशेसमुद्भवः॥३॥ गोदानेसूर्यनामाग्निर्विवाहेयोजकोमतः॥ आवसथ्येद्विजोज्ञेयोवैश्वदेवेतुरुक्मकः॥४॥ प्रायश्चित्तेविटश्चैवपाकयज्ञेषुपावकः॥ देवानांहव्यवाहश्च पितॄणांकव्यवाहनः॥॥५॥ शांतिकेवरदः प्रोक्तः पौष्टिकेबलवर्धनः॥ पूर्णाहुत्यामृडोनामक्रोधोग्निश्चाभिचारिके॥६॥ वश्यार्थेकामदोनामवनदाहेतुदूषकः॥ कुक्षौतुजाठरोज्ञेयः क्रव्यादोमृतदाहने॥७॥ वह्निनामालक्षहोमेकोटिहोमेहुताशनः

(2)

शानः॥ समुद्रवाउवोह्यग्निः क्षयेसंवर्त्तकस्तथा॥ ८॥ ब्रह्मा
वैगार्हपत्यश्चईश्वरोदक्षिणास्तथा॥ विष्णुराहवनीयःस्या
दग्निहोत्रेत्रयोग्नयः॥ ९॥ ज्ञात्वैवमग्निनामानिगृह्यक
र्मसमारभेत्॥ १०॥ ॥ ॥ श्रीगणेशायनमः॥ ॥
॥ श्रीमहालक्ष्म्यैनमः॥ ॥ अस्यश्रीसिद्धलक्ष्मीस्तोत्रमं
त्रस्य॥ हिरण्यगर्भऋषिः॥ श्रीमहाकालीमहालक्ष्मीम
हासरस्वती देवता॥ अनुष्टुप्छंदः॥ ओंबीजं॥ ह्रींशक्तिः॥
क्लींकिलकं॥ श्रीसिद्धलक्ष्मीप्रीत्यर्थंसिद्धलक्ष्मीस्तोत्रज
पेविनियोगः॥ ॥ अथन्यासः॥ ॐ श्रीसिद्धलक्ष्मीअंगुष्ठा
भ्यांनमः॥ ॐ ह्रींविष्णुतेजसेनमः॥ तर्जिनी०॥ ॐ क्लींअमृ
तानंदेमध्यमाभ्यां०॥ श्रींश्रींदैत्यमालिनिअनामिका०॥
ॐ ह्रींतेजप्रकाशिनिकनिष्ठिका०॥ ॐ श्रीं ह्रीं क्लीं श्रीं ॐ
ब्राह्मीवैष्णवीकरतलकरपृष्ठाभ्यांनमः॥ एवंहृदयादिषु

(2A)

वैक्तः॥ अथदिग्बंधः॥ ॐ श्रीं ह्रीं क्लीं श्रीं ॐ दिग्बंधः॥ अथध्यानं॥
ब्रह्माणीवैष्णवीरुद्राषड्भुजां चचतुर्मुखां॥ त्रिनेत्रांखड्गशूलांपद्मच
क्रगदाधरां॥१॥ पीतांबरधरांदेवीनानालंकारशोभितां॥ तेजःपुं
जधरांश्रेष्ठांध्यायद्बालकुमारिकां॥२॥ इतिध्यानं॥ अथमंत्रः॥
ॐ श्रीं ह्रीं क्लीं श्रीं ॐ सिद्धलक्ष्मीनमः॥ जपसंख्या॥ ६००००
ॐकारलक्ष्मीरूपेणविष्णुहृदयसंस्थित॥ विष्णुमानंदमानं
दे ह्रींकारांबीजरूपिणी॥१॥ क्लींमृतानंदकरेमिद्धसदाआनंद
दायिनी॥ श्रीदैत्यमर्दिनी शक्तिमालिनी शत्रुमर्दिनी॥ भाति
जः प्रकाशितादेवीवरदासुखकारिणी॥ ब्राह्मीचवैष्णवीरौ
द्रीकालिकारक्तशांभवी॥३॥ अकाराब्रह्मरूपेणउकारेविष्णु
मव्ययं॥ मकारः पुरुषोनामदेवीप्रणवमुच्यते॥४॥ सूर्यको
टिप्रतीकाशंचंद्रकोटिसमप्रभं॥ तन्मध्येनिरकंसूक्ष्मंब्रह्मरू
पव्यवस्थितं॥५॥ ॐकारपरमानंदः क्रियतेसुखसुंदरी॥ सि

(3)

२ धलक्ष्मीमहालक्ष्मीअद्यालक्ष्मीनमोस्तुते ॥६॥ सर्वमंगळमांगल्येशक्ति
सर्वार्थसाधके ॥ प्रसन्नमंबिकेगौरीद्वितीयंवैष्णवीतथा ॥७॥ तृतीयंकमला
प्रोक्ताच्चतुर्थंसुंदरीजया ॥ पंचमंविष्णुपत्नीचषष्ठंकौत्यायनीतथा ॥८॥ स
प्तमंतुवरारोहाअष्टमंहरिवल्लभा ॥ नवमंखड्गिनीशूलादशमंदेवदेवि
का ॥९॥ एकादशंसिद्धलक्ष्मीर्द्वादशंहंसबालिका ॥ एतंस्तोत्रमिमंमंत्रं
यःपठेत्सततंनरः ॥१०॥ सर्वपापविनिर्मुक्तोनात्रकार्यविचारणा ॥ एक
मासंद्विमासंवात्रिमासंचचतुर्थकं ॥११॥ पंचमासंचषण्मासंत्रिकालं
यःसदापठेत ॥ ब्राह्मणःक्लेशितादुःखदारिद्र्यभयपीडिताः ॥१२॥ जन्मां
तरसहस्रेषुमुच्यतेसर्वकिल्बिषैः ॥ अलक्ष्मीर्लभतेलक्ष्मीअपुत्रःपुत्रवा
भवेत ॥ धन्यायशस्वीशत्रुघ्नावह्निचौरभयेषुच ॥ शाकिनीभूतवे
तालसर्वव्याघ्रनिपातिते ॥१४॥ राजद्वारसभास्थानेकारग्रहनि
बंधने ॥ ईश्वरेणकृतंस्तोत्रंप्राणिनांहितकारणं ॥१५॥ स्तुवंतु
ब्राह्मणानित्यंदारिद्र्यंचनबाध्यते ॥ सर्वपापहरेलक्ष्मीःसर्वसिद्धि
प्रदायिनी ॥१६॥ ॥ इतिश्रीब्रह्मांडपुराणेसिंधुमथनईश्वरवि २
ष्णुसंवादेसिद्धलक्ष्मीस्तोत्रंसंपूर्णं ॥ ॥बाळंभटपुरोहितस्यपुस्तकं ॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

# मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com